MSS No. 181 Subject Language

Name of MSS नामलिंगानुशासन Nāmaliṅgānuśāsana

Author अमर सिंह

Period - - Folios 22

Script Sanskrit Source Prithipal Singh, Amritsar

Missing Folios - -

181

نارنگ شاہی

27

181

भोधीरा भवद्भिः सद्भिः सेव्यतां नामाराध्यतां सः कः यस्य अनघाः गुणाः सन्ति कथंभूतः सः अक्षयः कथंभूतस्य यस्य ज्ञानं
दयासिन्धोः पुनः कथंभूतस्य अगाधस्य कस्मै श्रियै च पुनः अमृताय नाम मोक्षाय इत्यन्वयः ॥१॥ चकारद्वयमुभयप्राधान्य
भो अनघा सधीराः ज्ञानप्रदः गुरुः सेव्यतां अस्माकगुरोः इ लक्ष्मीरस्ति च पुनः गुणाः सन्ति कथंभूतस्य अक्षेयः १ (द्योतनार्थं)

अ. प्र. १

ॐनमःसरस्वत्यै ॐयस्यज्ञानदयासिंधोरगाधस्यानघागुणाः सेव्यतामक्षयोधी
राःसश्रियेचामृतायच १ समाहृत्यान्यतंत्राणिसंक्षिप्तैःप्रतिसंस्कृतैः संपूर्ण
मुच्यतेवर्गैःनामलिंगानुशासने २ प्रायशोरूपभेदेनसाहचर्याच्चकुत्रचित्
स्त्रीपुंनपुंसकंज्ञेयंतद्विशेषविधेःक्वचित् ३ भेदाख्यानायनद्वंद्वोनैकशेषो
नसंकरः कृतोत्रभिन्नलिंगानामनुक्तानांक्रमादृते ४ त्रिलिंग्यांत्रिष्वितिप
दंमिथुनेतुद्वयोरिति निषिद्धलिंगंशेषार्थंत्वंताथादिनपूर्वभाक् ५ स्वर
व्ययंस्वर्गनाकत्रिदिवत्रिदशालयाः सुरलोकोद्योदिवौद्वेस्त्रियांक्लीबेत्रि
विष्टपं ६ अमरानिर्जरादेवास्त्रिदशाविबुधाःसुराः सुपर्वाणःसुमनसःत्रि

मयाअमरसिंहेन भिन्नलिंगानां द्वंद्वो न कृतः एकशेषश्च न कृतः कथंभूतानां नाम्नां अनुक्तानां तथा च भिन्नलिंगानां क्रमात् ऋते संकरो न कृतः कस्मै भेदाख्यानाय इत्यन्वयः ४॥ मयाऽमरसिंहेन त्रिलिंग्यां त्रिष्विति पदं दत्तं मिथुने तु द्वयोरिति पदं दत्तं अन्यत् निषिद्धलिंगं शेषार्थं त्वंताथादि न पूर्वभाक् इत्यन्वयः ५॥

इह शास्त्रप्रथमकाण्डे मयामरसिंहेन नामलिङ्गानुशासनं संपूर्णमुच्यते किं कृत्वा अन्यतंत्राणि समाहृत्य नामैकीकृत्य
कैः वर्गैः कथंभूतैः वर्गैः संक्षिप्तैः पुनः कथंभूतैः वर्गैः प्रतिसंस्कृतैः इत्यन्वयः २ अत्र नामलिंगानुशासने प्रायशो नाम बाहुल्येन रूपभेदेन
स्त्रीपुंनपुंसकं ज्ञेयं कुत्रचित् साहचर्यात् स्त्रीपुंनपुंसकं ज्ञेयं क्वचित् तद्विशेषविधेः स्त्रीपुंनपुंसकं ज्ञेयं इत्यन्वयः ३॥

दिवेशादिवौकसः ७ आदितेयादिविषदोलेखाअदितिनंदनः आदित्या
ऋभवोस्वप्नाअमर्त्याअमृतांधसः ८ बर्हिर्मुखाःक्रतुभुजोगीर्वाणादान
वारयः वृंदारकादैवतानिपुंसिवादेवतास्त्रियां ९ आदित्यविश्ववसव
स्तुषिताभास्वरानिलाः महाराजिकसाध्याश्चरुद्राश्चगणदेवताः १० वि
द्याधरोप्सरोयक्षरक्षोगंधर्वकिन्नराः पिशाचोगुह्यकःसिद्धोभूतोमीदेव
योनयः ११ असुरादैत्यदैतेयदनुजेंद्रारिदानवाः शुक्रशिष्यादितिसुताः
पूर्वदेवाःसुरद्विषः १२ सर्वज्ञःसुगतोबुद्धोधर्मराजस्तथागतः समंतभ
द्रोभगवान्मारजिल्लोकजिज्जिनः १३ षडभिज्ञोदशबलोद्वयवादीविना

अ॰ यकः मुनींद्रः श्रीघनः शास्ता मुनिः शाक्यमुनिस्तु यः १४ स शाक्यसिंहः सर्वा
प्र॰ र्थसिद्धः शौद्धोदनिश्च सः गौतमश्चार्कबंधुश्च मायादेवीसुतश्च सः १५ ब्रह्मा
२ त्मभूः सुरज्येष्ठः परमेष्ठी पितामहः हिरण्यगर्भो लोकेशः स्वयंभूश्चतुरान
नः १६ धाताब्जयोनिर्द्रुहिणो विरिंचिः कमलासनः स्रष्टा प्रजापतिर्वेधा वि
धाता विश्वसृग्विधिः १७ शतानंदः शतधृतिः स्थविरो हंसवाहनः विष्णुर्ना
रायणः कृष्णो वैकुंठो विष्टरश्रवाः १८ दामोदरो हृषीकेशः केशवो माधवः
स्वभूः दैत्यारिः पुंडरीकाक्षो गोविंदो गरुडध्वजः १९ पीतांबरोऽच्युतः शार्
ङ्गी विष्वक्सेनो जनार्दनः उपेंद्र इंद्रावरजश्चक्रपाणिश्चतुर्भुजः २० पद्मना २

भोमधुरिपुर्वासुदेवस्त्रिविक्रमः देवकीनंदनःशौरिःश्रीपतिःपुरुषोत्तमः २१
वनमालीबलिध्वंसीकंसारातिरधोक्षजः विश्वंभरःकैटभजिद्विधुःश्रीवत्स
लाञ्छनः २२ पुराणपुरुषोदाशार्होब्धिशायीयोगधामजः जलशायीवि
श्वरूपोमुकुंदोमुरमर्दनः २३ वसुदेवोस्यजनकःसएवानकदुंदुभिः बल
भद्रःप्रलंबघ्नोबलदेवोच्युताग्रजः २४ रेवतीरमणोरामःकामपालोह
लायुधः नीलांबरोरौहिणेयस्तालांकोमुसलीहली २५ संकर्षणःसी
रपाणिःकालिंदीभेदनोबलः मदनोमन्मथोमारःप्रद्युम्नोमीनकेतनः २ ६
कंदर्पोदर्पकोनंगःकामःपंचशरस्मरः शंभरारिर्मनसिजःकुसुमेषुरना

अ॰ त्मजः २७ पुष्पधन्वारतिपतिर्मकरध्वजआत्मभूः ब्रह्मसूऋष्यकेतुःस्यादनिरु।
प्र॰ द्धउषापतिः २८ लक्ष्मीःपद्मालयापद्माकलाश्रीर्हरिप्रिया क्षीरोदसंभवा।
२ संपत्सौभाग्यारुक्मिणीरमाः २९ शंखोलक्ष्मीपतेःपांचजन्यश्चक्रंसुद
र्शनः कौमोदकीगदाखड्गोनंदकःकौस्तुभोमणिः ३० गरुत्मान्गरुडस्ता
र्क्ष्योवैनतेयःखगेश्वरः नागांतकोविष्णुरथःसुपर्णःपन्नगाशनः ३१
शंभुरीशःपशुपतिःशिवःशूलीमहेश्वरः ईश्वरःसर्वईशानःशंकरश्चंद्रशे।
खरः ३२ भूतेशःखंडपरशुर्गिरीशोगिरिशोमृडः मृत्युंजयःकृत्तिवासाःपि २
नाकीप्रमथाधिपः ३३ उग्रःकपर्दीश्रीकंठःशितिकंठःकपालभृत् वाम

देवोमहादेवोविरूपाक्षोस्त्रिलोचनः ३४ कृशानुरेताःसर्वज्ञोधूर्जटिनीललो
हितः हरःस्मरहरोभर्गःत्र्यंबकस्त्रिपुरांतकः ३५ गंगाधरोंधकरिपुःक्रतुध्वं
सीवृषध्वजः व्योमकेशोभवोभीमःस्थाणुःरुद्रउमापतिः ३६ कपर्दीस्यज
टाजूटःपिनाकोजगवंधनुः प्रमथाःस्युःपारिषदःब्राह्मीत्याद्यास्तुमातरः ३७
ब्राह्मीमाहेश्वरीचैवकौमारीवैष्णवीतथा वाराहीनारसिंहीन्द्रीचामुंडास
प्तमातरः ३८ भूतिर्विभूतिरैश्वर्यमणिमादिकमष्टधा उमाकात्यायनीगौरी
रुद्राणीशर्वाणीसर्वमंगला ३९ अपर्णापार्वतीदुर्गामृडानीचंडिकांबिकं
जगन्माताभैरवीचसतीदाक्षायणीतथा ४० गणांबिकादेवदेवीह्यर्याच।

अ॰ कुलनायका योगनिद्रामहामायागिरिजामेनकात्मजा विनायकोविघ्नराजोद्वैमा
प्र॰ तुरगणाधिपः अप्येकदंतहेरंबलंबोधरगजाननाः ४२ कार्तिकेयोमहासेनः
४ शरजन्माषडाननः पार्वतीनंदनःस्कंदःसेनानीरग्निभूर्गुहः ४३ बाहुले
यतारकजिद्विशाखःशिखिवाहनः षाण्मातुरःशक्तिधरःकुमारःक्रौंचदार
णः ४४ इंद्रोमरुत्वान्मघवाबिडौजापाकशासनः वृद्धश्रवाःसुनासीरःपु
रुहूतःपुरंदरः ४५ जिष्णुःलेखर्षभःशक्रःशतमन्युर्दिवस्पतिः सुत्रामा
गोत्रभिद्वज्रीवासवोवृत्रहावृषाः ४६ वास्तोष्पतिस्सुरपतिर्बलारातिश्श ४
चीपतिः जंभभेदीहरिहयस्वाराननमुचिसूदनः ४७ संक्रंदनोदुश्च्यवनस्त

राषान्मेघवाहनः आखंडलस्सहस्राक्ष ऋभुक्षास्तस्यतुप्रिया ४८ पु
लोमजाशचीन्द्राणीनगरीत्वमरावती हयउच्चैश्रवाःसूतोमातलिर्नंदनं
वनं ४९ स्यात्प्रासादोवैजयंतोजयंतःपाकशासनिः ऐरावतोभ्रमातंगैराव
णाभ्रमुवल्लभाः ५० ह्रादिनीवज्रमस्त्रीस्यात्कुलिशंभिदुरंपविः शतकोटिः
स्वरुःशंबोदंभोलिरशनिर्द्वयोः ५१ व्योमयानंविमानोस्त्रीनारदाद्याःसुरा
र्षयः स्यात्सुधर्मादेवसभापीयूषममृतंसुधा ५२ मंदाकिनीवियद्गंगास्वर्ण
दीसुरदीर्घिका मेरुस्सुमेरुर्हेमाद्रीरत्नसानुस्सुरालयः ५३ पंचैतेदेवतर
वोमंदारःपारिजातकः संतानःकल्पवृक्षश्चपुंसिवाहरिचंदनं ५४ सना

त्कुमारोवैधात्रः स्वर्वैद्यावश्विनीसुतौ नासत्यावश्विनौदस्रावाश्विनेयौचतावुभौ ५५
अ. को. स्त्रियांबहुष्वप्सरसः स्वर्वेश्याउर्वशीमुखाः हाहाहूहूश्चैवमाद्यागंधर्वास्त्रिदिवौ।
५ कसां अग्निर्वैश्वानरोवह्निर्वीतिहोत्रोधनंजयः कृपीटयोनिर्ज्वलनोजातवेदा
स्तनूनपात् ५७ बर्हिःशुष्माकृष्णवर्त्माशोचिष्केशउषर्बुधः आश्रयाशोबृहद्भा
नुःकृशानुःपावकोनलः ५८ रोहिताश्वोवायुसखःशिखावानाशुशुक्षणि
णिः हिरण्यरेताहुतभुग्दहनोहव्यवाहनः ५९ सप्तार्चिर्दमुनाःशुक्रश्चित्र
भानुःविभावसुः शुचिरप्पित्तमौर्वस्तुवाडवोवडवानलः ६० वह्नेर्द्वयोर्ज्वा
लकीलावर्चिर्हेतिःशिखास्त्रियां त्रिषुस्फुलिंगोग्निकणः संतापःसंज्वरःसम ५

मो ६१ धर्मराजःपितृपतिस्समवर्तीपरेतराट् कृतांतोयमुनाभ्राताशमनो।
यमराड्यमः ६२ कालोदंडधरःश्राद्धदेवोवैवस्वतोंतकः प्रेताधिपःपाशह
स्तःकीनाशोमृत्युरर्कजः ६३ राक्षसःकौणपःक्रव्यान्क्रव्यादोस्रपआशरः
रात्रिंचरोरात्रिचरःकर्बुरोनिकषात्मजः ६४ यातुधानःपुण्यजनोनैरृतोया
तुरक्षसी प्रचेतावरुणःपाशीयादसांपतिरप्पतिः ६५ श्वसनःस्पर्शनोवा
युर्मातरिश्वासदागतिः पृषदश्वोगंधवहोगंधवाहानिलाशुगाः ६६ स
मीरमारुतमरुज्जगत्प्राणसमीरणाः नभस्वद्वातपवनपवमानप्रभंजनाः १२
वायुनामानिविंशतिः प्रकंपनस्तमसमिरोकंफाहस्पालोमरुत प्राणापा।

अ॰ नसमानोदानव्यानैः पंचवायवः हृदिप्राणोगुदेपानः समानोनाभिसंस्थितः
प्र॰ उदानः कंठदेशेचव्यानः सर्वशरीरगः नागःकूर्मश्चकृकरोदेवदत्तोधनंजयः
६ शरीरस्थाइमेरंहास्तरसीतुरयःस्यदः जवोथशीघ्रंत्वरितंलघुक्षिप्रमरंद्रु
तं सत्वरंचपलंतूर्णमविलम्बितमाशुच सततेनारताश्रांतासंततावि रता
निशं नित्यानवरताजस्रमप्यथातिशयोभरः अतिवेलभृशात्यर्थातिमात्रो
द्गाढनिर्भरं तीव्रैकांतनितांतानिगाढबाढदृढानिच क्लीबेशीघ्राद्यसत्वे
स्यात्त्रिष्वेषांसत्वगामियत् कुवेरस्त्र्यंबकसखोयक्षराड्गुह्यकेश्वरः म ६
नुष्यधर्माधनदोराजराजोधनाधिपः किन्नरेशोवैश्रवणः पौलस्त्योनरवा

ह्नः यक्षैकपिङ्गैलविलश्रीदपुण्यजनेश्वरः अस्योद्यानंचैत्ररथःपुत्रस्तुनल
कूबरः कैलासस्थानमलकापूर्विमानंतुपुष्पकं स्यात्किंनरःकिंपुरुषस्तु
रंगवदनोमयुः निधिर्नाशेवधिर्भेदाःशंखपद्मादयोनिधेः महापद्मश्चपद्म
श्चशंखोमकरकच्छपौ मुकुंदकुंदनीलाश्चखर्वश्चनिधयोनवः ॥ इतिस्व
र्गवर्गःप्रथमः १ ॥ द्योदिवौद्वेस्त्रियामभ्रंव्योमपुष्करमम्बरं नभोंतरिक्षंग
गनंमनंतंसुरवर्त्मखं १ वियद्विष्णुपदंवातुपुंस्याकाशविहायसी दिशस्तुक
कुभःकाष्ठाःआशाश्चहरितश्चताः २ प्राच्यवाचीप्रतीच्यस्ताःपूर्वदक्षिणप
श्चिमाः उत्तरादिगुदीचीस्याद्दिश्यंतुत्रिषुदिग्भवे ३ इंद्रोवह्निःपितृपतिर्नैऋ

अ॰ प्र॰ १

तोवरुणोमरुत् कुबेरईशाःपतयःपूर्वादीनांदिशांक्रमात् ४ ऐरावतःपुंडरी
कोवामनःकुमुदोंजनः पुष्पदंतःसार्वभौमःसुप्रतीकश्चदिग्गजाः ५ क
रिण्योभ्रमुःकपिलापिंगलानुपमाक्रमात् ताम्रकर्णीशुभ्रदंतीचांगनाचां
जनावती ६ क्लीबाव्ययंत्वपदिशंदिशोर्मध्येविदिक्स्त्रियां अभ्यंतरंत्वंतरा
लंचक्रवालंतुमंडलं अभ्रंमेघोवारिवाहःस्तनयित्नुर्बलाहकः धाराधरो
जलधरस्तडित्वान्वारिदोम्बुभृत् ८ घनजीमूतमुदिरजलमुग्धूमयोनयः
कादम्बिनीमेघमालात्रिषुमेघभवेभ्रियम् ९ स्तनितंगर्जितंमेघनिर्घोषेर
सितादिच शंपाशतह्रदाह्रादिन्यैरावत्यःक्षणप्रभा १० तडित्सौदामनीवि १

द्युच्चंचलाचपलापिच स्फूर्जथुर्वज्रनिर्घोषोमेघज्योतिरिरम्मदः ११ इंद्रायु
धंशक्रधनुस्तदेवऋजुरोहितम् वृष्टिर्वर्षंतद्विघातेवग्राहावग्रहौसमौ १२
धारासंपातआसारःशीकरोम्बुकणाःस्मृताः वर्षोपलस्तुकरकामेघछन्ने
ह्निदुर्दिनम् अंतर्धाव्यवधापुंसित्वंतर्धिरपवारणं अपिधानतिरोधानपिधा
नाछादनानिच १३ हिमांशुश्चंद्रमाश्चंद्रइंदुःकुमुदबांधवः विधुःसुधांशु ः
शुभ्रांशुरोषधीशोनिशापतिः अब्जोजैवातृकःसोमोग्लौर्मृगांकःकलानि।
धिः द्विजराजःशशधरोनक्षत्रेशःक्षपाकरः १५ कलातुषोडशोभागोबिं
बोस्त्रीमंडलंत्रिषु भित्तंशकलखंडेवापुंस्यर्धोर्धंसमेंशके १६ चंद्रिकाकौ।

अ० मुदीज्योत्स्नाप्रसादस्तुप्रसन्नता कलंकांकौलांछनंचचिह्नंलक्ष्मचलक्षणं सु
प्र० षमापरमाशोभाशोभाकांतिर्द्युतिश्छविः अवश्यायस्तुनीहारस्तुषारस्तुहि
८ नंहिमं १८ प्रालेयंमिहिकाचाथहिमानीहिमसंहतिः शीतंगुणेतद्वदर्थाःसु
षीमःशिशिरोजडः १९ तुषारःशीतलःशीतोहिमःसप्तान्यलिंगकाः ध्रुवऔ
त्तानपादिःस्यादगस्त्यःकुंभसंभवः २० मैत्रावरुणिरस्यैवलोपामुद्रासध
र्मिणी नक्षत्रमृक्षंभंतारातारकाप्युडुवास्त्रियाम् दाक्षायिण्योऽश्विनीत्यादिता
राअश्वयुगश्विनी राधाविशाखापुष्येतुसिद्धतिष्यौश्रविष्ठया २२ समाधनिष्ठाः ८
स्युःप्रोष्ठपदाभाद्रपदास्त्रियः मृगशीर्षंमृगशिरस्तस्मिन्नेवाग्रहायणी २३ इल्व

लास्तच्छिरोदेशेतारकानिवसंतियाः बृहस्पतिस्सुराचार्योगीर्पतिर्धिषणोगु
रुः २४ जीवआंगिरसोवाचस्पतिश्चित्रशिखंडिजः शुक्रोदैत्यगुरुःकाव्यउ
शनाभार्गवःकविः २५ अंगारकःकुजोभौमोलोहितांगोमहीसुतः रौहिणेयो
बुधःसौम्यःसमौसौरिशनैश्चरौ २६ तमस्तुराहुःस्वर्भानुःसैंहिकेयोविधुंतुदः
सप्तर्षयोमरीच्यत्रिमुखाश्चित्रशिखंडिनः २७ राशीनामुदयोलग्नंतेतुमेषवृ
षादयः सूरसूर्यार्यमादित्यद्वादशात्मदिवाकराः २८ भास्कराहस्करब्रध्नप्र
भाकरविभाकराः भास्वद्विवस्वत्सप्ताश्वहरिदश्वोष्णरश्मयः २९ विकर्तना
र्कमार्तंडमिहिरारुणपूषणः द्युमणिस्तरणिर्मित्रश्चित्रभानुर्विरोचनः ३० वि

अ॰ भावसुर्ग्रहपतिस्त्विषांपतिरहर्पतिः भानुर्हंसः सहस्रांशुस्तपनः सविता रविः ३१
प्र॰ माठरःपिंगलोदंडश्चंडांशोःपारिपार्श्वकाः सूरसूतोरुणोनूरुःकाश्यपिर्गरुडा
४ ग्रजः ३२ परिवेशस्तुपरिधिरुपसूर्यकमंडले किरणोस्रमयूखांशुगभस्ति
घृणिरश्मयः ३३ भानुःकरोमरीचिस्त्रीपुंसयोर्दीधितिस्त्रियां स्युःप्रभारुग्रु
चिस्त्विड्भाभाश्छविद्युतिदीप्तयः ३४ रोचिःशोचिरुभेक्लीवेप्रकाशोद्योतआत
पः कोष्णंकवोष्णंमंदोष्णंकदुष्णंत्रिषुतद्वति ३५ तिग्मंतीक्ष्णंखरंतद्वन्मृगा
तृष्णामरीचिका ३६ इतिदिग्वर्गः ३ कालोदिष्टोप्यनेहापिसमयोप्यथ ६
पक्षति प्रतिपद्द्वेइमेस्त्रीत्वेतदाद्यास्तिथयोद्वयोः १ घस्रोदिनाहनीवातुक्ली

वेदिवसवासरौ प्रत्यूषोहर्मुखंकल्यमुषःप्रत्यूषसीअपि २ प्रभातंचदिना
न्तेतुसायंसंध्यापितृप्रसूः प्राह्णापराह्णमध्याह्नास्त्रिसंध्यमथशर्वरी ३ नि
शानिशीथिनीरात्रिस्त्रियामाक्षणदाक्षपा विभावरीतमस्विन्यौरजनीयामि
नीतमी ४ तमिस्रातामसीरात्रिर्ज्योत्स्नीचंद्रिकयान्विता आगामिवर्तमा
नाहर्युक्तायांनिशिपक्षिणी ५ गणरात्रंनिशाबह्व्यःप्रदोषोरजनीमुखं
अर्द्धरात्रनिशीथौद्वौद्वौयामप्रहरौसमौ ६ सपर्वसंधिःप्रतिपत्पंचदश्योर्य
दंतरम् पक्षान्तौपंचदश्यौद्वेपौर्णमासीतुपूर्णिमा ७ कलाहीनेसानु
मतिःपूर्णेराकानिशाकरे अमावस्यात्वमावास्यादर्शःसूर्येंदुसंगमः ८ सा

अ॰ प्र॰ १०

दृष्टेंदुःसिनीवालीसानष्टेंदुःकलाकुहूः उपरागोग्रहोराहुग्रस्तेत्विन्दौचपूष्णि
च ९ सोपप्लवोपरक्तौद्वावग्न्युत्पातःउपाहितः एकयोक्त्यापुष्पवंतौदिवा
करनिशाकरौ १० अष्टादशनिमेषास्तुकाष्ठात्रिंशत्तुताकला तास्तुत्रिंशत्
क्षणस्तेतुमुहूर्तोद्वादशास्त्रियाम् ११ तेतुत्रिंशदहोरात्रःपक्षस्तेदशपंचच
पक्षौपूर्वापरौशुक्लकृष्णौमासस्तुतावुभौ १२ द्वौद्वौमाघादिमासौस्यादृतु
स्तैरयनंत्रिभिः अयनेद्वेगतिरुदग्दक्षिणार्कस्यवत्सरः १३ समरात्रिंदिवेका
लेविषुवद्विषुवंचतत् पुष्ययुक्तापौर्णमासीपौषीमासेतुयत्रसा १४ नाम्ना १०
सपौषोमाघाद्याश्चैवमेकादशापरे मार्गशीर्षेसहामार्गआग्रहायणिकश्च

मः १५ पौषेतैषसहस्यौद्वौतपामाघेथफाल्गुणे स्यात्तपस्यःफाल्गुणिकः।
स्याच्चैत्रेचैत्रिकोमधुः १६ वैशाखेमाधवोराधोज्येष्ठेशुक्रःशुचिस्त्वयं आषाढे
श्रावणेतुस्यान्नभाःश्रावणिकश्चसः १७ स्युर्नभस्यप्रौष्ठपदभाद्रभाद्रपदाःस
माः स्यादाश्विनइषोप्याश्वयुजोपिस्यात्तुकार्तिके १८ बाहुलोर्जौकार्तिकि।
कोहेमन्तःशिशिरोस्त्रियां वसंतपुष्पसमयःसुरभीग्रीष्मऊष्मकः १९ निदा
घउष्णोपगमउष्णऊष्मागमस्तपः स्त्रियांप्रावृट्स्त्रियांभूम्निवर्षाअथशरत्स्त्रि।
याम् षडमीऋतवःपुंसिमार्गादीनांयुगैःक्रमात् संवत्सरोवत्सरोब्दोहाय
नोस्त्रीशरत्समाः मासेनस्यादहोरात्रःपैत्रोवर्षेणदैवतः दैवेयुगसहस्रेद्वे।

अ॰ म॰ ११

ब्राह्मःकल्पौतुतौनृणाम् २२ मन्वंतरंतुदिव्यानांयुगानामेकसप्ततिः संवर्त्तःप्र
लयःकल्पःक्षयःकल्पांतइत्यपि २३ अस्त्रीपंकंपुमान्पाप्मापापंकिल्बिषकल्मषम्
कलुषंवृजिनैनोघमंहोदुरितदुष्कृतं २४ स्याद्धर्ममस्त्रियांपुण्यश्रेयसीसुकृतं
वृषः मुत्प्रीतिःप्रमदोहर्षःप्रमोदामोदसंमदाः २५ स्यादानंदथुरानंदःशर्मशा
तसुखानिच श्वःश्रेयसंशिवंभद्रंकल्याणंमंगलंशुभं २६ भावुकंभविकंभव्यं
कुशलंक्षेममस्त्रियां शस्तंचाथत्रिषुद्रव्येपापपुण्यसुखानिच २७ मतल्लिकाम
चर्चिकाप्रकांडमुद्धतल्लजौ प्रशस्तवाचकान्यमून्ययःशुभावहोविधिः २८
दैवंदिष्टंभागधेयंभाग्यंस्त्रीनियतिर्विधिः हेतुर्नाकारणंबीजंनिदानंत्वादिकार ११

णं २९ क्षेत्रज्ञआत्मापुरुषःप्रधानंप्रकृतिस्त्रियां विशेषःकालिकोवस्थागु
णाःसत्वंरजस्तमः ३० जनुर्जननजन्मानिजनिरुत्पत्तिरुद्भवः प्राणीतुचेतनो
जन्मीजंतुजन्युशरीरिणः ३१ जातिर्जातंचसामान्यंव्यक्तिस्तुपृथगात्मता
चित्तंतुचेतोहृदयंस्वांतंहृन्मानसंमनः ३२ ॥ इतिकालवर्गः ३ ॐबुद्धिर्मनी
षाधिषणाधीःप्रज्ञाशेमुषीमतिः प्रेक्षोपलब्धिश्चित्संवित्प्रतिपज्ज्ञप्तिचेतनाः १
धीर्धारणावतीमेधासंकल्पःकर्ममानसं चित्ताभोगोमनस्कारश्चर्चासंख्या
विचारणा २ अध्याहारस्तर्कऊहोविचिकित्सातुसंशयः संदेहद्वापरौचा
थसमौनिर्णयनिश्चयौ मिथ्यादृष्टिर्नास्तिकताव्यापादोद्रोहचिंतनं समौ

अ. प्र. १२ सिद्धान्तोराद्धांतोभ्रांतिर्मिथ्यामतिभ्रमः ४ संविदागूः प्रतिज्ञानंनियमाश्रवसंश्रवा :
अंगीकाराभ्युपगमप्रतिश्रवसमाधयः मोक्षेधीर्ज्ञानमन्यत्रविज्ञानंशिल्पशास्त्र
योः मुक्तिकैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतं ६ मोक्षोपवर्गोथाज्ञानमविद्या
हम्मतिस्त्रियां रूपंशब्दोगंधरससस्पर्शाश्चविषयाअमी ७ गोचराइंद्रियार्थाश्चहृ
षीकंविषयींद्रियं कर्मेंद्रियंतुपाय्वादिमनोनेत्रादिधींद्रियं ८ तुवरस्तुकषायो
स्त्रीमधुरोलवणःकटुः तिक्तोम्लश्चरसाःपुंसितद्वत्सुषडमीत्रिषु ९ विमर्दोत्थे
परिमलोगंधेजनमनोहरे आमोदःसोतिनिर्हारीवाच्यलिंगत्वमागुणात् १० १२
समाकर्षीतुनिर्हारीसुरभिर्घ्राणतर्पणः इष्टगंधःसुगंधिःस्यादामोदीमुखवा

सनः ११ पूतिगंधिस्तुदुर्गंधोविस्रंस्यादामगंधियत् शुक्लशुभ्रशुचिश्वेतविश
दश्येतपाण्डुराः १२ अवदातःसितोगौरोवलक्षोधवलोर्जुनः हरिणःपाण्डुरःपा
ण्डुरीषत्पाण्डुस्तुधूसरः १३ कृष्णेनीलासितश्यामकालश्यामलमेचकाः पी
तोगौरोहरिद्राभःपालाशोहरितोहरित् १४ लोहितोरोहितोरक्तःशोणःको
कनदच्छविः अव्यक्तरागस्त्वरुणःश्वेतरक्तस्तुपाटलः १५ श्यावःस्यात्का
पिलोधूम्रधूमलौकृष्णलोहिते कडारःकपिशःपिंगपिशंगौकद्रुपिंगलौ १६
चित्रंकिर्मीरकल्माषशबलैताश्चकर्बुरे गुणेशुक्लादयःपुंसिगुणिलिंगा
स्तुतद्वति १७ इतिधीवर्गः ४ ॐ ब्राह्मीतुभारतीभाषागीर्वाग्वाणीसरस्वती

अ॰ व्याहार उक्तिर्लपितं भाषितं वचनं वचः १ अपभ्रंशोपशब्दः स्याच्छास्त्रे शब्दस्तु वा
प्र॰ चकः तिङ्सुबंतचयो वाक्यं क्रिया वा कारकान्विता २ श्रुतिस्त्री वेद आम्नायस्त्र
२२ यीधर्मस्तु तद्विधिः स्त्रियामृक्सामयजुषी इति वेदास्त्रयस्त्रयी ३ शिक्षेत्यादि
श्रुतेरंगमोंकारप्रणवौ समौ इतिहासः पुरावृत्तमुदात्ताद्यास्त्रयः स्वराः ४ आ
न्वीक्षिकी दण्डनीतिस्तर्कविद्यार्थशास्त्रयोः आख्यायिकोपलब्धार्थः पुराणं
पंचलक्षणं ५ प्रबंधकल्पना कथा प्रवह्लिका प्रहेलिका स्मृतिस्तु धर्मसंहि
ता समाहृतिस्तु संग्रहः ६ समस्या तु समासार्था किंवदन्ती जनश्रुति विवा
दो व्यवहारः स्यादुपन्यासस्तु वाङ्मुखं ७ उपोद्घात उदाहारः शपनं शपथः पु २२

मान् प्रश्नोनुयोगः पृछाचप्रतिवाक्योत्तरेसमे ८ मिथ्याभियोगोभ्याख्यान
मथमिथ्याभिसंसनम् अभिशापःप्रणादस्तुशब्दःस्यादनुरागजः ९ यशः
कीर्तिसमज्ञाचस्तवःस्तोत्रंस्तुतिर्नुतिः आम्रेडितंद्विस्त्रिरुक्तमुच्चैर्घुष्टंतुघोष
णा काकुःस्त्रियांविकारोयःशोकभीत्यादिभिर्ध्वनेः अवर्णाक्षेपनिर्वादपरी।
वादापवादवत् ११ उपक्रोशोजुगुप्साचकुत्सानिंदाचगर्हणे पारुष्यमति।
वादःस्याद्भर्त्सनंत्वपकारगीः १२ यःसनिंदउपालंभस्तत्रस्यात्परिभाषणं त
त्रत्वाक्षारणायःस्यादाक्रोशोमैथुनंप्रति १३ स्यादाभाषणमालापःप्रलापो
नर्थकंवचः अनुलापोमुहुर्भाषाविलापःपरिदेवनं १४ विप्रलापोविरोधो।

अ॰ प्र॰ १४ क्तिः संलापो भाषणं मिथः सुप्रलापः सुवचनमपलापस्तु निह्नवः १५ संदेशवा
ग्वाचिकं स्याद्वाग्भेदास्तु त्रिषूत्तरे रुषती वागकल्याणी स्यात्कल्या तु शुभात्मिका १६
अत्यर्थमधुरं सांत्वं संगतं हृदयंगमम् निष्ठुरं परुषं ग्राम्यमश्लीलं सूनृतं प्रिये १७
सत्येऽथ संकुलक्लिष्टे परस्परपराहते लुप्तवर्णपदं ग्रस्तं निरस्तं त्वरितोदितम् १८
अंबूकृतं सनिष्ठेवमबद्धं स्यादनर्थकं अनक्षरमवाच्यं स्यादाहतं तु मृषार्थकम् १९
अथ म्लिष्टमविस्पष्टं वितथं त्वनृतं वचः सोल्लुंठनं तु सोत्प्रासं मणितं रतिकूजि
तं २० सत्यं तथ्यमृतं सम्यगमूनि त्रिषु तद्वति शब्दे निनादनिनदध्वनिध्वानरव
स्वना २१ स्वाननिर्ह्रादनिर्घोषह्रादनिःस्वाननिस्वनाः आरवारावसंरावविरावा १४

अथ मर्मरः २२ स्वनिते वस्त्रपर्णानां भूषणानां तु शिंजितम् निक्वाणो निक्वणः
क्वाणः क्वणः क्वणनमित्यपि २३ वीणायाः क्वणिते प्रादेः प्रक्वाणः प्रक्वणादयः
कोलाहलः कलकलस्तिरश्चां वाशितं रुतम् २४ स्त्री प्रतिश्रुत् प्रतिध्वाने गीतं
मानमिमे समे २५ ॥ इति शब्दादिवर्गः पंचमः ॥ ५ ॥ श्रीः ॥ ॐ निषादर्षभगां-
धारषड्जमध्यमधैवताः पंचमश्चेत्यमी सप्त तंत्रीकंठोत्थिताः स्वराः १ काक-
लीत कले सूक्ष्मे ध्वनौ तु मधुरास्फुटे कलो मंद्रस्तु गंभीरे तारोत्युच्चैस्त्रयस्त्रिषु २
समन्वितलयस्त्वेकताली वीणा तु वल्लकी विपंची सा तु तंत्रीभिः सप्तभिः परि-
वादिनी ३ ततं वीणादिकं वाद्यमानद्धं मुरजादिकम् वंशादिकं तु सुषिरं कांस्य-

(interlinear glosses: एकं सूक्ष्मस्वरस्य १ · एकं मधुरस्वरस्य ॥ गंभीरस्वरस्य १ ॥ अत्युच्चस्वरस्य १ · एकतालस्य १ · वीणायाः ३ · सप्ततंतुवीणायाः १ · वीणादिवाद्यस्य १ · मृदंगादिवाद्यस्य १ · वंशशंखादिवाद्यस्य १)

अ॰ प्र॰ १५

तालादिकंघनम् ४ चतुर्विधमिदंवाद्यंवादित्रातोद्यनामकं मृदंगामुरजाभेदास्त्वं
क्यालिंग्योर्ध्वकास्त्रयः ५ स्याद्यशःपटहोढक्काभेरीस्त्रीदुंदुभिःपुमान् आ
नकःपटहोस्त्रीस्यात्कोणोवीणादिवादनम् ६ वीणादंडःप्रवालःस्यात्ककुभस्तुप्र
सेवकः कोलंबकस्तुकायोस्याउपनाहोनिबंधनं ७ वाद्यप्रभेदाडमरुमड्डुडिंडि
मझर्झराः मर्दलःपणवोन्येचनर्तकीलासिकेसमे ८ विलंबितंद्रुतंमध्यंतत्त्वमो
घोघनंक्रमात् तालःकालक्रियामानंलयःसाम्यमथास्त्रियां ९ तांडवंनटनंना
ट्यंलास्यंनृत्यंचनर्तने तौर्यत्रिकंनृत्यगीतवाद्यंनाट्यमिदंत्रयं १० भ्रकुंसश्चभ्रु
कुंसश्चभ्रूकुंसश्चेतिनर्तकः स्त्रीवेषधारीपुरुषोनाट्योक्तौगणिकाज्जुका ११ १५

भगिनीपतिरावुत्तो भावो विद्वानथावुकः जनको युवराजस्तु कुमारो भर्तृदारकः १२
राजा भट्टारको देवस्तत्सुता भर्तृदारका देवी कृताभिषेकायामितरासु च भट्टिनी १३
अब्रह्मण्यमवध्योक्तौ राजस्यालस्तु राष्ट्रियः अंबा माताथ बालः स्याद्वासूरार्यस्तु मा
रिषः १४ अत्तिका भगिनी ज्येष्ठा निष्ठानिर्वहने समे हंडे हंजे हे हलाह्वाने नीचां चेटीं
सखीं प्रति १५ अंगहारोंगविक्षेपो व्यंजकाभिनयौ समौ निर्वृत्ते त्वंगसत्वाभ्यां ।
द्वे त्रिष्वांगिकसात्विके १६ शृंगारवीरकरुणाद्भुतहास्यभयानकाः वीभत्सरौद्रौ
शांतिश्च शृंगारः शुचिरुज्वलः उत्साहवर्द्धनो वीरः कारुण्यं करुणा घृणा कृपा
दयानुकंपा स्यादनुक्रोशोप्यथो हसः हासो हास्यं च वीभत्सं विकृतं त्रिष्विदं द्वयं ।

अद्भुतस्य ४ भयानकस्य ६

अ॰ विस्मयोऽद्भुतमाश्चर्यं चित्रमप्यथ भैरवं १९ दारुणं भीषणं भीष्मं घोरं भीमं भयानकं

को॰ वदुमयानकस्य २ भयस्य ५

भयंकरं प्रतिभयं रौद्रं तूग्रममी त्रिषु २० चतुर्दश दरस्त्रासो भीतिर्भीः साध्वसं भयं ।

१५ मनोविकारस्य १ भावस्य स्वचकोगुणक्रियादिऽनुभावः २१ अहंकारस्य ३ मानस्य २

विकारो मानसो भावोऽनुभावो भावबोधकः गर्वोऽभिमानोऽहंकारो मानश्चित्तस

अनादरस्य ९

मुन्नतिः अनादरः परिभवः परीभावस्तिरस्क्रिया रीढावमाननावज्ञावहेल नं २२

लज्जायाः ५ अन्यतोलज्जायाः १ क्षमानाम २ परधनविषयइच्छायाः नाम ३

मसूर्क्षणं मंदाक्षं ह्रीस्त्रपा व्रीडा लज्जा सापत्रपान्यतः क्षान्तिस्तितिक्षाभि

ईर्ष्यानाम २ परगुणेदोषारोपणनाम १ वैरनाम ३

ध्यातु परस्वविषये स्पृहा अक्षान्तिरीर्ष्यासूया तु दोषारोपो गुणेष्वपि २४ वैरं विरो १५

षो विद्वेषो मन्युशोकौ तु शुक् स्त्रियाम् । पश्चात्तापोऽनुतापश्च विप्रतीसार इत्यपि २५
कोपक्रोधामर्षरोषप्रतिघा रुट्क्रुधौ स्त्रियौ । शुचौ तु चरिते शीलं उन्मादश्चित्त
विभ्रमः २६ प्रेमा ना प्रियता हार्दं प्रेम स्नेहोऽथ दोहदम् । इच्छा कांक्षा स्पृहेहा तृ
ड्वांछा लिप्सा मनोरथः २७ कामोऽभिलाषस्तर्षश्च सोऽत्यर्थं लालसा द्वयोः । उपा
धिर्ना धर्मचिंता पुंस्याधिर्मानसी व्यथा २८ स्याच्चिंता स्मृतिराध्यानमुत्कंठोत्क
लिके समे उत्साहोऽध्यवसायः स्यात्स वीर्यमतिशक्तिभाक् २९ कपटोऽस्त्री व्याज
दंभोपधयश्छद्मकैतवे कुसृतिर्निकृतिः शाठ्यं प्रमादोऽनवधानता ३० कौतू
हलं कौतकं च कुतकं च कुतोहलम् । स्त्रीणां विलासविब्बोकविभ्रमा ललितं त

अ॰ था ३१ हेलालीलेत्यमीहावाः क्रियाःशृंगारभावजाः द्रवकेलिपरीहासाः क्रीडा
प्र॰ लीलाचनर्मच ३२ व्याजोपदेशोलक्ष्यंचक्रीडाखेलाचकूर्दनम् घर्मोनिदा
२९ घः स्वेदःस्यात्प्रलयोनष्टचेष्टता ३३ अवहित्थाकारगुप्तिःसमौसंवेगसंभ्रमौ
स्यादाच्छुरितकेहासःसोत्प्रासःसमनाक्स्मितम् ३४ मध्यमःस्याद्विहसितंरो
माचोरोमहर्षणम् क्रंदितंरुदितंक्रुष्टंजृंभस्तुत्रिजृंभणम् ३५ विप्रलंभोवि
संवादोरिंगणंस्खलनंसमे स्यान्निद्राशयनंस्वापःस्वप्नःसंवेशइत्यपि ३६
तंद्रीप्रमीलाभ्रकुटिर्भ्रुकुटिर्भृकुटिःस्त्रियाम् अदृष्टिःस्यादसौम्येक्ष्णिसंसिद्धिप्र १६
कृतीत्विमे ३७ स्वरूपंचस्वभावश्चनिसर्गश्चाथवेपथुः कंपोथक्षणउद्धर्षोम

हउद्धवउत्सवः २८ इतिनाट्यवर्गः ७ अथोभुवनपातालंबलिसद्मरसातलम्
नागलोकोथकुहरंसुषिरंविवरंबिलम् १ छिद्रंनिर्व्यथनंरोकंरंध्रंश्वभ्रंवपासुषिः
गर्तोवटोभुविश्वभ्रेसरंध्रेसुषिरंत्रिषु २ अंधकारोस्त्रियांध्वांतंतमिस्रंतिमिरंत
मः ध्वांतेगाढेंधतमसंक्षीणेवतमसंतमः ३ विष्वक्संतमसंनागाःकाद्रवेया
स्तदीश्वरः शेषोनंतोवासुकिस्तुसर्पराजोथगोनसे ४ तिलित्सःस्यादजगरे
शयुर्वाहसइत्युभौ अलगर्दोजलव्यालःसमौराजिलडुंडुभौ ५ मालुधानो
मातुलाहिर्निर्मुक्तोमुक्तकंचुकः सर्पःपृदाकुर्भुजगोभुजंगोहिर्भुजंगमः ६ आ
शीविषोविषधरश्चक्रीव्यालःसरीसृपः कुंडलीगूढपाच्चक्षुःश्रवाकाकोदरः

म. प्र. १७

फणी ७ दर्वीकरो दीर्घपृष्ठो दंदशूको विलेशयः उरगः पन्नगो भोगी जिह्मगः पवना
शनः ८ त्रिष्वाहेयं विषास्थ्यादि स्फटायां तु फणा द्वयोः समौ कंचुकनिर्मोकौ क्ष्वेड
स्तु गरलं विषम् ९ पुंसि क्लीबे च काकोलकालकूटहलाहलाः सौराष्ट्रिकः
शौक्लिकेयो ब्रह्मपुत्रः प्रदीपनः १० दारदो वत्सनाभश्च विषभेदा अमी नव विषवै
द्यो जांगलिको व्यालग्राह्यहितुंडिकः ११ इति पातालभोगवर्गः ८ स्यान्नारक
स्तु नरको निरयो दुर्गतिः स्त्रियाम् तद्भेदास्तपनावीचिमहारौरवरौरवाः १ संहारः
कालसूत्रं च संघाताद्याः सहस्रशः प्रेता वैतरणी सिंधुः स्यादलक्ष्मीस्तु निर्ऋ
तिः २ विष्टिराजूः कारणा तु यातना तीव्रवेदना पीडा बाधा व्यथा दुःखमामनस्यं १७

: नदीनाथो वारिपूरो कासिमालोने घध्वजः २

प्रसूतिजम् २ स्यात्कष्टंकृच्छ्रमाभीलंत्रिष्वेषांभेद्यगामियत् इतिनरकवर्गः ४ स

मुद्रोब्धिरकूपारःपारावारःसरित्पतिः उदन्वानुदधिःसिंधुःसरस्वान्सागरोर्णवः १

रत्नाकरोजलनिधिर्यादःपतिरपांपतिः तस्यप्रभेदाःक्षीरोदोलवणोदस्तथा — नदीनाथो

परे २ आपःस्त्रीभूम्निवार्वारिसलिलंकमलंजलम् पयःकीलालममृतंजी

वनंभुवनंवनम् ३ कबंधमुदकंपाथःपुष्करंसर्वतोमुखम् अंभोर्णस्तोयपा

नीयनीरक्षीरांबुशंबरम् ४ मेघपुष्पंघनरसस्त्रिषुद्वेआप्यमम्मयम् भंगस्त

रंगऊर्मिर्वास्त्रियांवीचिरथोर्मिषु महत्सूल्लोलकल्लोलौस्यादावर्तोंभसांभ्र

मः पृषंतिबिंदुपृषताःपुमांसोविप्रुषःस्त्रियां ५ चक्राणिपुटभेदाःस्युर्भ्रमा

स्यज्जलनिर्गमाः । कूलं रोधश्च तीरं च प्रतीरं च तटं त्रिषु ७ पारावारे परार्वाची तीरे पा
अ॰ त्रं तदन्तरम् । द्वीपोऽस्त्रियामन्तरीपं यदन्तर्वारिणस्तटम् ८ तोयोत्थितं तत्पुलिनं
प्र॰
२८ सैकतं सिकतामयम् । निषद्वरस्तु जंबालः पंकोऽस्त्री शादकर्दमौ ९ जलोच्छ्वासाः
परीवाहाः कूपकास्तु विदारकाः । नाव्यं त्रिलिंगं नौतार्ये स्त्रियां नौस्तरणिस्तरिः १०
उडुपं तु प्लवः कोलः स्रोतोऽम्बुसरणं स्वतः । आतरस्तरपण्यं स्याद्द्रोणी काष्ठांबुवाहि-
नी ११ सांयात्रिकः पोतवणिक् कर्णधारस्तु नाविकः । नियामकाः पोतवाहाः कूपको
गुणवृक्षकः १२ नौकादण्डः क्षेपणी स्यादरित्रं केनिपातकः । अभ्रिः स्त्री काष्ठकुद्दा- २८
लः सेकपात्रं तु सेचनम् १३ यानपात्रं तु पोतोऽब्धिभवे सामुद्रियं त्रिषु सामुद्रिकीम

नुष्योब्धिजातादौनौस्त्रमुद्रिका: १४ क्लीवेर्द्धनावंनावोर्द्धेतीतनौकेतिनुत्रिषु
त्रिष्वागाधात्प्रसन्नोच्छ: कलुषोनच्छ आविल: १५ निम्नंगंभीरंगंभीरमुत्तानंतद्विप
र्यये अगाधमतलस्पर्शेकेवर्त्तेदासधीवरौ १६ आनाय: पुंसिजालंस्याच्छणसूत्रं
पवित्रकम् मत्स्याधानीकुवेणीस्याद्बडिशंमत्स्यवेधनम् १७ पृथुरोमाझषोमत्स्यो
मीनोवैसारिणोण्डज: विसार:शकुलीचाथगडक:शकुलार्भक: १८ सहस्रदंष्ट्र:
पाठीनउलूपीशिशुक:समौ नलमीनश्चिलिचिम: प्रोष्ठीतुशफरीद्वयो: १९ क्षु
द्राण्डमत्स्यसंघात: पोताधानमथोझषा: रोहितोमद्गुर:शालोराजीव:शकुलस्ति
मि: २० तिमिंगिलादयश्चाथयादांसिजलजंतव: तद्भेदा:शिशुमारोद्रशंकवो

अ॰ प्र॰ १९

मकरादयः २१ स्यात्कुलीरः कर्कटकः कूर्म्मे कमठकच्छपौ ग्राहोऽवहारो नक्रस्तु कुं-
भीरोऽथ महीलता २२ गंडूपदः किंचुलको निहाका गोधिका समे रक्तपा तु जलौ-
कायां स्त्रियां भूम्नि जलौकसः २३ मुक्तास्फोटः स्त्रियां शुक्तिः शंखः स्यात्कंबुरस्त्रि-
याम् क्षुद्रशंखाः शंखनखाः शंबूका जलशुक्तयः २४ भेके मंडूकवर्षाभूशालूरप्ल-
वदर्दुराः शिली गंडूपदी भेकी वर्षाभ्वी कमठी डुलिः २५ मद्गुरस्य प्रिया शृंगी दुर्न्ना-
मा दीर्घकोशिका जलाशयो जलाधारस्तत्रागाधजलो ह्रदः २६ आहावस्तु निपानं-
स्यादुपकूपजलाशये पुंस्येवांधुः प्रहिः कूप उदपानं तु पुंसि वा २७ नेमिस्त्रिकास्य वी-
नाहो मुखबंधनमस्य यत् पुष्करिण्यां तु खातं स्यादखातं देवखातकं २८ पद्माक १९

रस्तडागोऽस्त्री कासारः सरसी सरः वेशंतः पल्वलं चाल्पसरो वापी तु दीर्घिका २९
खेयं तु परिखाधारस्त्वंभसां यत्र धारणम् स्यादालवालमावालमावापोऽथ नदी स
रित् ३० तरंगिणी शैवलिनी तटिनी ह्रादिनी धुनी स्रोतस्वती द्वीपवती स्रवंती नि
म्नगापगा ३१ गंगा विष्णुपदी जह्नुतनया सुरनिम्नगा भागीरथी त्रिपथगा त्रि
स्रोता भीष्मसूरपि ३२ कालिंदी सूर्यतनया यमुना शमनस्वसा रेवा तु नर्मदा
सोमोद्भवा मेकलकन्यका ३३ करतोया सदानीरा बाहुदा सैतवाहिनी शतद्रुस्तु
शुतुद्रिः स्याद्विपाशा तु विपाट् स्त्रियाम् ३४ शोणो हिरण्यवाहः स्यात्कुल्याल्पा कृ
त्रिमा सरित् शरावती वेत्रवती चंद्रभागा सरस्वती कावेरी सरितोऽन्याश्च संभेदः सिं

अ॰ धुसंगमः ३५ द्वयोः प्रणाली पयसः पदव्यां त्रिषु तूत्तरौ देविकायां सरय्वां च भवे दाविकसा
प्र॰ रवौ ३६ सौगंधिकं तु कल्हारं हल्लकं रक्तसंध्यकम् स्यादुत्पलं कुवलयम् अथ नीला
२० बुजन्म च ३७ इंदीवरं च नीलेस्मिन् सिते कुमुदकैरवे शालूकमेषां कंदः स्याद्वारिप
र्णी तु कुंभिका ३८ जलनीली तु शैवालं शैवलोथ कुमुद्वती कुमुदिन्यां नलिन्यां तु वि
सिनी पद्मिनीमुखाः ३९ वा पुंसि पद्मं नलिनम् अरविंदं महोत्पलम् सहस्रपत्रं कम
लं शतपत्रं कुशेशयम् ४० पंकेरुहं तामरसं सारसं सरसीरुहम् बिसप्रसूनराजीव
पुष्करांभोरुहाणि च ४१ पुंडरीकं सितांभोजम् अथ रक्तसरोरुहे रक्तोत्पलं कोकनदं ना
लो नालम् अथास्त्रियाम् ४२ मृणालं बिसम् अब्जादिकदंबे षंडमस्त्रियाम् कारहाटः शि। २०

अम. फाकंदः किंजल्कः केसरोस्त्रियाम् ४२ संवर्त्तिका नवदलं बीजकोषो वराटकः इति
प्र. वारिवर्गः दशमः १० ॥ उक्तं स्वर्व्योमदिक्कालधीशब्दादि सनाट्यकम् पातालभोगि
२१ नरकं वारि चैषां च संगतम् १ इत्यमरसिंहकृतौ नामलिंगानुशासने स्वर्गादिकांडः प्र
थमः १ सांगएव समर्थितः समाप्तोयमिति कांडः प्रथमः १ ॥ ॥ ॥ ॥

| | | |
|---|---|---|
| Sans. MS. 4583 | | |
| Al. 114 181-Ms. | | नामलिंगानुशासन ॥ अमरसिंह<br>कृत / स्कंद १<br>२१ पत्रक ॥ ल० अ० ८पं० प्र० पृ०<br><br>ह० ल० |